GOVT. BRENNEN COLLEGE THALASSERY

**M 6520**

Reg. No. : ..............................

Name : ..................................

**II Semester B.A. Degree (CCSS – Reg./Supple./Improv.)**
**Examination, May 2014**
**CORE COURSE IN SANSKRIT**
**2B02 SKT : Gadyakavya and Khandakavya**

Time: 3 Hours Max. Weightage : 30

*सूचना : सर्वे प्रश्ना: संस्कृत भाषयैव समाधेया: ।*

I. 1) कोष्ठात् समुचितमुत्तरं निर्धार्य लिखत ।

a) उदारचरितानां किं कुटुम्बकं भवति ।
(गृहमेव, वसुधैव, नगरमेव, ग्राममेव)

b) कस्य गति: त्वरिता भवति ?
(धर्मस्य, कामस्य, मनस:, वायो:)

c) छिद्रेषु के बहुलीभवन्ति ?
(जना:. रागा:, अनर्था:, रोगा:)

d) न मन्त्रं ________________ कुर्यात् सार्धंभिक्षुभिरेव च ।
(दुर्बुद्धि:, अल्पबुद्धि:, मतिमान् , विनष्ट बुद्धि:) **(1×1=1)**

2) a) यक्ष: कुत्र वसतिं चक्रे ?
(रामगिर्यां, अलकायां, उज्जयिन्यां, न कुत्रापि)

b) सन्देशकाव्येषु प्रयुज्यमानं वृत्तं किम् ?
(मन्दाक्रन्ता, मालिनी, स्रग्धरा, शार्दूलविक्रीडितम् )

c) उपलविषमें विन्ध्यपादे मेघ: कां द्रक्ष्यति ?
(उज्जयिनीं, रेवां, यमुनां, विदिशाम् )

d) उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि–केषाम् ?
(नागराणां, अलकावासिनां, देवानां, ग्रामीणानाम् ) **(1×1=1)**

P.T.O.

II. द्वे व्याख्यात :

3) सर्पाणां च खलानां च सर्वेषां दुष्टचेतसाम् ।
अभिप्राया न सिद्ध्यन्ति तेनेदं वर्तते जगत् ॥

4) सारमेयस्य चाश्वस्य रासभस्य विशेषतः ।
मुहूर्तात्परतो न स्यात् प्रहारजनिता व्यथा ॥

5) मर्षयेद् घर्षणां थोऽत्र वंशजां परनिर्मिताम्
भयाद्वा यदिवा कामात् सज्ञेयः पुरुषाधमः ॥ (2×2=4)

III. द्वे व्याख्यात :

6) प्रालेयाद्रेरुपतटमतिक्रम्य नांस्तान् विशेषान्
हंसद्वारं भृगुपतियशो वर्त्म चत्क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥

7) तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्न विद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषम्
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥

8) दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ (2×2=4)

IV. सप्रकरणं त्रयाणामाशयं विशदयत ।

9) जयति तुलामधिरूढो भास्वानिह जलदपटलानि ।

10) कामार्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः ।



11) अपरीदय न कर्तव्यं कर्तव्यं सुपरीक्षितम् ।

12) लोभाभिभूतेन त्वया न कृतं मद्वचः ।

13) महाजनो येन गतः स पन्थाः । (2×3=6)

V. सप्रकरणं त्रयाणामाशयं विशदयत ।

14) रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।

15) प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तयोञ्चैः ।

16) राशीभूतः प्रतिदिनमिव त्र्यम्बकस्यादृष्टासः ।

17) स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खम् ।

18) उद्दामानि प्रथयति शिलावेश्मभिर्योवनानि । (2×3=6)

VI. द्वे उत्तरयत :

19) पञ्चतन्त्रोक्तरीत्या ब्राह्मणीनकुलकथां अथवा लोभाविष्टचक्रधरकथां विवृणुत ।

20) मेघसन्देशदिशा कालिदासस्य प्रकृतिवर्णनापाटवं उपपादयत ।

अथवा

कालिदासोक्तरीत्या उज्जयिनीं उपवर्णयत । (4×2=8)

---